International Journal of Sanskrit Research 2021; 7(2): 80-84

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(2): 80-84
© 2021 IJSR
www.anantaajournal.com
Received: 15-01-2021
Accepted: 19-02-2021

**डॉ. धर्मेश शर्मा**
ऐसिस्टैण्ट प्रोफैसर, संस्कृतविभागः, नेहरू मैमोरियल शिव नारायण दास स्नातकोत्तर महाविद्यालय, बदायूँ, उत्तर प्रदेश, भारत

**Corresponding Author:**
**डॉ. धर्मेश शर्मा**
ऐसिस्टैण्ट प्रोफैसर, संस्कृतविभागः, नेहरू मैमोरियल शिव नारायण दास स्नातकोत्तर महाविद्यालय, बदायूँ, उत्तर प्रदेश, भारत

# अष्टाध्याय्याः सङ्ख्यात्मकं विश्लेषणम्

## डॉ. धर्मेश शर्मा

**सारांश**
शब्दानां द्वयोर्विभागयोर्लौकिके वैदिके च कृतयोः सतोः सामान्यतः केषाञ्चिद् वैयाकरणानामेषा धारणा जायते यदष्टाध्याय्यामुपर्युक्तानां द्विप्रकारकशब्दानां व्याकरणार्थं द्विप्रकारकौ विभागौ लौकिकसूत्राणि वैदिकसूत्राणि च भवतः। अस्या धारणायाः पृष्ठे कारणमेतदस्ति यत् सामान्यत इदमवगम्यते यद्यानि सूत्राणि वैदिकशब्दानां व्याकरणं कथयन्ति तानि वैदिकसूत्राणि कथ्यन्ते तथा चावशिष्टानि सूत्राणि यानि वैदिकशब्दानां व्याकरणं न कथयन्ति तानि लौकिकसूत्राणि कथ्यन्ते। परन्त्वेषा धारणा काचिदपूर्णा विद्यते। वस्तुतः पाणिनेराशयः शब्दमात्रस्य व्याकरणस्य प्रस्तुतकरणेनास्ति। एवं सति पाणिनिर्वेदे तथा लोके च यत्र कांश्चन विशिष्टान् कस्मिंश्चिदेकस्मिन् क्षेत्रे (लोकेऽथवा वेदे) एव प्रयुक्तान् शब्दानुपलेभे तत्र स क्रमशः 'छन्दसि', 'भाषायाम्' इत्यादिभिः शब्दैर्वैदिकलौकिकसूत्राणां विभागं प्रस्तुतं चकार, अवशिष्टानि सूत्राणि शब्दमात्रस्यार्थाल्लोके वेदे च प्रयुक्तानां शब्दानां व्याकरणं प्रस्तुतं कुर्वन्ति। एवमेतेषु सर्वेषु बिन्दुषु विचारयन्तो वयमष्टाध्याय्याः सर्वाणि सूत्राणि त्रिषु विभागेषु विभक्तुं शक्नुमः– वैदिकसूत्राणि, लौकिकसूत्राणि, सामान्यसूत्राणि चेति।

**कूटशब्दः–** अष्टाध्याय्याः, सङ्ख्यात्मकम्, विश्लेषणम्, वैदिकसूत्राणि, लौकिकसूत्राणि, सामान्यसूत्राणि।

**प्रस्तावना**
शब्दानां द्वयोर्विभागयोर्लौकिके वैदिके च कृतयोः सतोः सामान्यतः केषाञ्चिद् वैयाकरणानामेषा धारणा जायते यदष्टाध्याय्यामुपर्युक्तानां द्विप्रकारकशब्दानां व्याकरणार्थं द्विप्रकारकौ विभागौ लौकिकसूत्राणि वैदिकसूत्राणि च भवतः। अस्या धारणायाः पृष्ठे कारणमेतदस्ति यत् सामान्यत इदमवगम्यते यद्यानि सूत्राणि वैदिकशब्दानां व्याकरणं कथयन्ति तानि वैदिकसूत्राणि कथ्यन्ते यथा– 'बहुलं छन्दसि' (अष्टाध्यायीसूत्रपाठः 2/4/73) इत्यादीनि तथा चावशिष्टानि सूत्राणि यानि वैदिकशब्दानां व्याकरणं न कथयन्ति तानि लौकिकसूत्राणि कथ्यन्ते। परन्त्वेषा धारणा काचिदपूर्णा विद्यते यतो हि यदि वैदिकसूत्रेभ्योऽवशिष्टानि सूत्राणि लौकिकसूत्राणि स्युस्तर्ह्येतस्मादियमर्थापत्तिर्जायते यत् पाणिनिर्येषु सूत्रेषु वैदिकशब्दानां व्याकरणं कथयामास केवलं तावतामेव वैदिकशब्दानां व्याकरणं पाणिनिप्रोक्तं स्यात्, अवशिष्टानां नैव यतो ह्यवशिष्टानि सूत्राणि तु लौकिकशब्दानां व्याकरणं कथयेयुः। अस्मिन्नाधारे पाणिनेर्व्याकरणमपूर्णं सिद्धं स्यात्। वस्तुतः पाणिनेराशयः शब्दमात्रस्य व्याकरणस्य प्रस्तुतकरणेनास्ति। एवं सति पाणिनिर्वेदे तथा लोके च यत्र कांश्चन विशिष्टान् कस्मिंश्चिदेकस्मिन् क्षेत्रे (लोकेऽथवा वेदे) एव प्रयुक्तान् शब्दानुपलेभे तत्र स क्रमशः 'छन्दसि', 'भाषायाम्' इत्यादिभिः शब्दैर्वैदिकलौकिकसूत्राणां विभागं प्रस्तुतं चकार, अवशिष्टानि सूत्राणि शब्दमात्रस्यार्थाल्लोके वेदे च प्रयुक्तानां शब्दानां व्याकरणं प्रस्तुतं कुर्वन्ति। अनेन सार्धमेव यदि वैदिकसूत्रेभ्योऽवशिष्टानि सर्वाणि सूत्राणि लौकिकानि स्युस्तर्हि पाणिनिना कुत्रचिल्लौकिकशब्दानां व्याकरणं कथयता 'भाषायां सदवसश्रुवः' (अष्टाध्यायीसूत्रपाठः 3/2/108) इत्यादिषु सूत्रेषु 'भाषायाम्' इत्येतस्य शब्दस्य ग्रहणं व्यर्थं स्यात्, केवलं 'छन्दसि' इत्येतन्नानुवर्ततेऽत्रेत्येतद्व्याख्यानमेव पर्याप्तं स्याद्यथा चान्यत्रानेकस्थलेषु वृत्तिग्रन्थेषु द्रष्टुं शक्यते। एवमेतेषु सर्वेषु बिन्दुषु विचारयन्तो वयमष्टाध्याय्याः सर्वाणि सूत्राणि त्रिषु विभागेषु विभक्तुं शक्नुमः– वैदिकसूत्राणि, लौकिकसूत्राणि, सामान्यसूत्राणि चेति।

**1, वैदिकसूत्राणि–** वैदिकसूत्राणि तानि सन्ति येषु लोकादितरेषामुपलब्धानां केषाञ्चिद्विशिष्टवैदिकशब्दानां व्याकरणं प्रस्तुतं कृतमस्ति। एतत्प्रकारकाणां सूत्राणां कार्यक्षेत्रं 'वेदा अर्थाद् मन्त्राः (संहिताः)', 'ब्राह्मणग्रन्थाः' इत्यादिषु वैदिकग्रन्थेषूपलब्धाः केचन विशिष्टशब्दास्सन्ति। एतत्प्रकारकेषु सूत्रेषु पाणिनिः 'छन्दसि', 'मन्त्रे', 'निगमे', ' ऋक्षु' इत्यादिभिः शब्दैर्विभागं प्रदर्शितं चकार यथा– 'बहुलं छन्दसि'

(अष्टाध्यायीसूत्रपाठः 2/4/76), 'मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्' (अष्टाध्यायीसूत्रपाठः 3/2/71)इत्यादीनि। एतदतिरिक्तं केषुचिद्वैदिकसूत्रेष्वीदृशैः शब्दैर्विभागो न प्रदर्शितोऽस्ति। परन्तु सामर्थ्येन तेषां कार्यक्षेत्रं वैदिकशब्देभ्योऽन्यत्र सम्भव एव नास्ति, तान्यपि वैदिकसूत्राण्येव मतानि, यथा– 'शे' (अष्टाध्यायीसूत्रापाठः 1/1/13) इत्यादीनि।

**2, लौकिकसूत्राणि–** लौकिकसूत्राणि तानि सूत्राणि सन्ति येषु केवलं लोक एव प्रयुक्तानां केषाञ्चिद्विशिष्टलौकिकशब्दानां व्याकरणं प्रस्तुतं कृतमस्ति। एतत्प्रकारकाणां सूत्राणां कार्यक्षेत्रं केवलं भाषायामर्थाल्लोके प्रयुक्ताः केचन विशिष्टशब्दा एव सन्ति। एतत्प्रकारकेषु सूत्रेषु पाणिनिः 'भाषायाम्' इत्यादिभिः शब्दैर्विभागं प्रस्तुतं चकार, यथा– 'भाषायां सदवसश्रुवः' (अष्टाध्यायीसूत्रपाठः 3/2/108) इत्यादीनि।

**3, सामान्यसूत्राणि–** सामान्यसूत्राणि तानि सन्ति येषु शब्दानां लौकिकवैदिकभेदं न ध्यायता पाणिनिना सामान्यरूपेणोभयविधस्यार्थात् शब्दमात्रस्य व्याकरणं प्रस्तुतं कृतमस्ति। एतत्प्रकारकाणां सूत्राणां कार्यक्षेत्रं लोके वेदे चोपलब्धाः शब्दास्सन्ति, यथा– 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' (अष्टाध्यायीसूत्रपाठः 3/1/7) इत्यादीनि। इत्थमेतेषां त्रयाणां विभागानामाधरेऽष्टाध्याय्याः सूत्राणां सूक्ष्मं सङ्ख्यात्मकं विश्लेषणमनेन प्रकारेणास्ति–

**सङ्ख्यात्मकं विश्लेषणम्–**

**1– वैदिकसूत्राणि–** सम्पूर्णायामष्टाध्याय्यां (अस्मिन् सङ्ख्यात्मके विश्लेषणे 'रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा' इत्येतस्मात् संस्थानात् प्रकाशितः 'अष्टाध्यायीसूत्रपाठः' इत्येष ग्रन्थ एवाधाररूपेण स्वीकृतोऽस्ति) वैदिकसूत्राणां सम्पूर्णा सङ्ख्या 269 (एकोनसप्तत्युत्तरशतद्वयम्) अस्ति। एतानि वैदिकसूत्राणि 'छन्दसि', 'ब्राह्मणे' इत्यादिभिः शब्दैः कृतैर्विभागैः सम्पूर्णेषु 9 (नव) विभागेषु विभक्तानि सन्ति येषां सूक्ष्मं सङ्ख्यात्मकं विश्लेषणमनेन प्रकारेणास्ति–

**(क) 'छन्दसि'सूत्राणि–** एतानि वैदिकसूत्राणि तानि सन्ति येषु 'छन्दसि'शब्देन छन्दस्यर्थाद् मन्त्रे ब्राह्मणे च सामान्यरूपेणोपलब्धानां केषाञ्चिद्विशिष्टशब्दानां व्याकरणं प्रस्तुतं कृतमस्ति। एतत्प्रकारकाणां सूत्राणां सम्पूर्णा सङ्ख्या वैदिकसूत्राणां विभागे सर्वाधिका 218 (अष्टादशोत्तरशतद्वयम्) अस्ति। एतानि सूत्राणि सन्ति–
विभाषा छन्दसि (अष्टाध्यायीसूत्रपाठः 1/2/36), छन्दसि पुनर्वस्वोरेकवचनम् (अष्टाध्यायीसूत्रपाठः 1/2/61), विशाखयोश्च (अष्टाध्यायीसूत्रपाठः 1/2/62), षष्ठीयुक्तश्छन्दसि वा (अष्टाध्यायीसूत्रपाठः 1/4/9), अयस्मयादीनिच्छन्दसि (अष्टाध्यायीसूत्रपाठः 1/4/20), छन्दसि परेऽपि (अष्टाध्यायीसूत्रपाठः 1/4/80), व्यवहिताश्च (अष्टाध्यायीसूत्रपाठः 1/4/81), तृतीया च होश्छन्दसि (अष्टाध्यायीसूत्रपाठः 2/3/3), चतुर्थ्यर्थे बहुलं छन्दसि (अष्टाध्यायीसूत्रपाठः 2/3/62), यजेश्च करणे (अष्टाध्यायीसूत्रपाठः 2/3/63), हेमन्तशिशिरावहोरात्रे चच्छन्दसि (अष्टाध्यायीसूत्रपाठः 2/4/28), बहुलं छन्दसि (अष्टाध्यायीसूत्रपाठः 2/4/39), बहुलं छन्दसि (अष्टाध्यायीसूत्रपाठः 2/3/73), बहुलं छन्दसि (अष्टाध्यायीसूत्रपाठः 2/4/76), अभ्युत्सादयांप्रजनयांचिकयांरमयामकः पावयाङ्क्रियाद्विदामक्रन्नितिच्छन्दसि (अष्टाध्यायीसूत्रपाठः 3/1/42), गुपेश्छन्दसि (अष्टाध्यायीसूत्रपाठः 3/1/50), नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः (अष्टाध्यायीसूत्रपाठः 3/1/51), कृमृदृरुहिभ्यश्छन्दसि (अष्टाध्यायीसूत्रपाठः 3/1/59), छन्दसि शायजपि (अष्टाध्यायीसूत्रपाठः 3/1/84), व्यत्ययो बहुलम् (अष्टाध्यायीसूत्रपाठः 3/1/85), लिङ्याशिष्यङ् (अष्टाध्यायीसूत्रपाठः 3/1/86), छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि (अष्टाध्यायीसूत्रपाठः 3/1/123), छन्दसि वनसनरक्षिमथाम् (अष्टाध्यायीसूत्रपाठः 3/2/27), छन्दसि सहः (अष्टाध्यायीसूत्रपाठः 3/1/63), वहश्च (अष्टाध्यायीसूत्रपाठः 3/1/64), कव्यपुरीषपुरीष्येषु ञ्युट् (अष्टाध्यायीसूत्रपाठः 3/2/65), हव्येऽनन्तःपादम् (अष्टाध्यायीसूत्रपाठः 3/2/66), जनसनखनक्रमगमो विट् (अष्टाध्यायीसूत्रपाठः 3/2/67), विजुपे छन्दसि (अष्टाध्यायीसूत्रपाठः 3/2/73), आतो मनिन्क्वनिब्वनिपश्च (अष्टाध्यायीसूत्रपाठः 3/2/74), बहुलं छन्दसि (अष्टाध्यायीसूत्रपाठः 3/2/88), छन्दसि लिट् (अष्टाध्यायीसूत्रपाठः 3/2/105), लिटः कानज्वा (अष्टाध्यायीसूत्रपाठः 3/2/106), क्वसुश्च (अष्टाध्यायीसूत्रपाठः 3/2/107), णेश्छन्दसि (अष्टाध्यायीसूत्रपाठः 3/2/137), भुवश्च (अष्टाध्यायीसूत्रपाठः 3/2/138), क्याच्छन्दसि (अष्टाध्यायीसूत्रपाठः 3/2/170), आदृगमहनजनः किकिनौ लिट् च (अष्टाध्यायीसूत्रपाठः 3/2/171), छन्दसि गत्यर्थेभ्यः (अष्टाध्यायीसूत्रपाठः 3/3/129), अन्येभ्योऽपि दृश्यते (अष्टाध्यायीसूत्रपाठः 3/3/130), छन्दसि लुङ्लङ्लिटः (अष्टाध्यायीसूत्रपाठः 3/4/6), लिङर्थे लेट् (अष्टाध्यायीसूत्रपाठः 3/4/7), उपसंवादाशङ्कयोश्च (अष्टाध्यायीसूत्रपाठः 3/4/8), तुमर्थे सेसेनसेऽसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः (अष्टाध्यायीसूत्रपाठः 3/4/9), प्रयै रोहिष्यै अव्यथिष्यै (अष्टाध्यायीसूत्रपाठः 3/4/10), दृशे विख्ये च (अष्टाध्यायीसूत्रपाठः 3/4/11), शकि णमुल्कमुलौ (अष्टाध्यायीसूत्रपाठः 3/4/12), ईश्वरे तोसुन्कसुनौ (अष्टाध्यायीसूत्रपाठः 3/4/13), कृत्यार्थे तवैकेन्केन्यत्वनः (अष्टाध्यायीसूत्रपाठः 3/4/14), अवचक्षे च (अष्टाध्यायीसूत्रपाठः 3/4/15), भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् (अष्टाध्यायीसूत्रपाठः 3/4/15), सृपितृदोः कसुन् (अष्टाध्यायीसूत्रपाठः 3/4/17), वा छन्दसि (अष्टाध्यायीसूत्रपाठः 3/4/88), छन्दस्युभयथा (अष्टाध्यायीसूत्रपाठः 3/4/117), नित्यं सञ्ज्ञाछन्दसोः (अष्टाध्यायीसूत्रपाठः 4/1/29), केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च (अष्टाध्यायीसूत्रपाठः 4/1/30), रात्रेश्चाजसौ (अष्टाध्यायीसूत्रपाठः 4/1/31) (एतेषां त्रयाणां सूत्राणां कार्यक्षेत्रं 'संज्ञाछन्दसोः' इत्येतस्य शब्दस्य कथनाल्लोको वेदश्चोभयमस्ति परन्तु 'संज्ञा' लोकस्यांशिकं क्षेत्रमस्ति यदा तु छन्दो वेदस्य व्यापकं क्षेत्रमस्ति, अत उभयविधेषु सत्स्वप्येतेषु सूत्रेषु वैदिकक्षेत्रस्याधिकतायाः कारणाद्वयमेतानि त्रीणि सूत्राणि 'वैदिकसूत्राणि' इत्येतन्नामके विभाग एव परिगणितवन्तः), नित्यं छन्दसि (अष्टाध्यायीसूत्रपाठः 4/1/46), भुवश्च (अष्टाध्यायीसूत्रपाठः 4/1/47), दीर्घजिह्वी चच्छन्दसि (अष्टाध्यायीसूत्रपाठः 4/1/59), कद्रुकमण्डल्वोश्छन्दसि (अष्टाध्यायीसूत्रपाठः 4/1/71), छन्दसि ठञ् (अष्टाध्यायीसूत्रपाठः 4/3/19), वसन्ताच्च (अष्टाध्यायीसूत्रपाठः 4/3/20), हेमन्ताच्च (अष्टाध्यायीसूत्रपाठः 4/3/21), द्व्यचश्छन्दसि (अष्टाध्यायीसूत्रपाठः 4/3/148), नोत्वद्वर्ध्रबिल्वात् (अष्टाध्यायीसूत्रपाठः 4/3/149), ढश्छन्दसि (अष्टाध्यायीसूत्रपाठः 4/4/106), भवे छन्दसि (अष्टाध्यायीसूत्रपाठः 4/4/110), पाथोनदीभ्यां ड्यण् (अष्टाध्यायीसूत्रपाठः 4/4/111), वेशन्तहिमवद्भ्यामण् (अष्टाध्यायीसूत्रपाठः 4/4/112), स्रोतसो विभाषा ड्यड्ड्यौ (अष्टाध्यायीसूत्रपाठः 4/4/113), सगर्भसयूथसनुताद् यन् (अष्टाध्यायीसूत्रपाठः 4/4/114), तुग्राद् घन् (अष्टाध्यायीसूत्रपाठः 4/4/115), अग्राद् यत् (अष्टाध्यायीसूत्रपाठः 4/4/116), घच्छौ च (अष्टाध्यायीसूत्रपाठः 4/4/117), समुद्राभ्राद् घः (अष्टाध्यायीसूत्रपाठः 4/4/118), बर्हिषि दत्तम् (अष्टाध्यायीसूत्रपाठः 4/4/119), दूतस्य भागकर्मणी (अष्टाध्यायीसूत्रपाठः 4/4/120), रक्षोयातूनां हननी (अष्टाध्यायीसूत्रपाठः 4/4/121), रेवतीजगतीहविष्याभ्यः प्रशस्ये (अष्टाध्यायीसूत्रपाठः 4/4/122), असुरस्य स्वम् (अष्टाध्यायीसूत्रपाठः 4/4/123), मायायामण् (अष्टाध्यायीसूत्रपाठः 4/4/124), तद्वानासामुपधानो मन्त्र

इतीष्टकासु लुक्च मतोः (अष्टाध्यायीसूत्रपाठः 4/4/125), अश्विमानण् (अष्टाध्यायीसूत्रपाठः 4/4/126), वयस्यासु मूर्ध्नो मतुप् (अष्टाध्यायीसूत्रपाठः 4/4/127), मत्वर्थे मासतन्वोः (अष्टाध्यायीसूत्रपाठः 4/4/128), मधोर्ञ च (अष्टाध्यायीसूत्रपाठः 4/4/129), ओजसोऽहनि यत्खौ (अष्टाध्यायीसूत्रपाठः 4/4/130), वेशोयशआदेर्भगाद् यल् (अष्टाध्यायीसूत्रपाठः 4/4/131), ख च (अष्टाध्यायीसूत्रपाठः 4/4/132), पूर्वैः कृतमिनयौ च (अष्टाध्यायीसूत्रपाठः 4/4/133), अद्भिः संस्कृतम् (अष्टाध्यायीसूत्रपाठः 4/4/134), सहस्रेण सम्मितौ घः (अष्टाध्यायीसूत्रपाठः 4/4/135), मतौ च (अष्टाध्यायीसूत्रपाठः 4/4/136), सोममर्हति यः (अष्टाध्यायीसूत्रपाठः 4/4/137), मये च (अष्टाध्यायीसूत्रपाठः 4/4/138), मधोः (अष्टाध्यायीसूत्रपाठः 4/4/139), वसोः समूहे च (अष्टाध्यायीसूत्रपाठः 4/4/140), नक्षत्राद् घः (अष्टाध्यायीसूत्रपाठः 4/4/141), सर्वदेवात्तातिल् (अष्टाध्यायीसूत्रपाठः 4/4/142), शिवशमरिष्टस्य करे (अष्टाध्यायीसूत्रपाठः 4/4/143), भावे च (अष्टाध्यायीसूत्रपाठः 4/4/144), सप्तनोऽञ्छन्दसि (अष्टाध्यायीसूत्रपाठः 5/1/60), छन्दसि च (अष्टाध्यायीसूत्रपाठः 5/1/66), वत्सरान्ताच्छश्छन्दसि (अष्टाध्यायीसूत्रपाठः 5/1/90), सम्परिपूर्वात्ख च (अष्टाध्यायीसूत्रपाठः 5/1/91), छन्दसि घस् (अष्टाध्यायीसूत्रपाठः 5/1/105), थट् च छन्दसि (अष्टाध्यायीसूत्रपाठः 5/2/50), छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि (अष्टाध्यायीसूत्रपाठः 5/2/89), बहुलं छन्दसि (अष्टाध्यायीसूत्रपाठः 5/2/122), वा ह चच्छन्दसि (अष्टाध्यायीसूत्रपाठः 5/3/13), तयोर्दार्हिलौ चच्छन्दसि (अष्टाध्यायीसूत्रपाठः 5/3/20), था हेतौ चच्छन्दसि (अष्टाध्यायीसूत्रपाठः 5/3/26), पश्च पश्चा चच्छन्दसि (अष्टाध्यायीसूत्रपाठः 5/3/33), तुश्छन्दसि (अष्टाध्यायीसूत्रपाठः 5/3/59), प्रत्नपूर्वविश्वेमात्थाल्छन्दसि (अष्टाध्यायीसूत्रपाठः 5/3/111), अमु चच्छन्दसि (अष्टाध्यायीसूत्रपाठः 5/4/12), वृकज्येष्ठाभ्यां तिल्तातिलौ चच्छन्दसि (अष्टाध्यायीसूत्रपाठः 5/4/41), अनसन्तान्नपुंसकाच्छन्दसि (अष्टाध्यायीसूत्रपाठः 5/4/103), ऋतश्छन्दसि (अष्टाध्यायीसूत्रपाठः 5/4/158), बहुलं छन्दसि (अष्टाध्यायीसूत्रपाठः 6/1/33), चायः की (अष्टाध्यायीसूत्रपाठः 6/1/34), अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याज श्राताः श्रितमाशीराशीर्ताः (अष्टाध्यायीसूत्रपाठः 6/1/35), खिदेश्छन्दसि (अष्टाध्यायीसूत्रपाठः 6/1/51), शीर्षंश्छन्दसि (अष्टाध्यायीसूत्रपाठः 6/1/59), शेश्छन्दसि बहुलम् (अष्टाध्यायीसूत्रपाठः 6/1/68), भय्यप्रवय्ये चच्छन्दसि (अष्टाध्यायीसूत्रपाठः 6/1/80), वा छन्दसि (अष्टाध्यायीसूत्रपाठः 6/1/102), आङोऽनुनासिकश्छन्दसि बहुलम् (अष्टाध्यायीसूत्रपाठः 6/1/122), स्यश्छन्दसि बहुलम् (अष्टाध्यायीसूत्रपाठः 6/1/129), अञ्चेश्छन्दस्यसर्वनामस्थानम् (अष्टाध्यायीसूत्रपाठः 6/1/164), ङ्याश्छन्दसि बहुलम् (अष्टाध्यायीसूत्रपाठः 6/1/172), जुष्टार्पिते चच्छन्दसि (अष्टाध्यायीसूत्रपाठः 6/1/203), आद्युदात्तं द्व्यच्छन्दसि (अष्टाध्यायीसूत्रपाठः 6/2/119), विभाषा छन्दसि (अष्टाध्यायीसूत्रपाठः 6/2/164), परादिश्छन्दसि बहुलम् (अष्टाध्यायीसूत्रपाठः 6/2/198), पितरामातरा चच्छन्दसि (अष्टाध्यायीसूत्रपाठः 6/3/32), ङ्यापोः सञ्ज्ञाछन्दसोर्बहुलम् (अष्टाध्यायीसूत्रपाठः 6/3/62) (एतत्सूत्रमपि 'संज्ञाछन्दसोः' इत्येतस्य शब्दस्य कथनादुभयविधे सत्यपि वैदिकक्षेत्रास्याधिकतायाः कारणात् पूर्ववद् 'वैदिकसूत्राणि' इत्येतन्नामके विभाग एव परिगणितवन्तः), समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु (अष्टाध्यायीसूत्रपाठः 6/3/83), सध मादस्थयोश्छन्दसि (अष्टाध्यायीसूत्रपाठः 6/3/95), पथि चच्छन्दसि (अष्टाध्यायीसूत्रपाठः 6/3/107), छन्दसि च (अष्टाध्यायीसूत्रपाठः 6/3/125), छन्दस्युभयथा (अष्टाध्यायीसूत्रपाठः 6/4/5), नृ च (अष्टाध्यायीसूत्रपाठः 6/4/6), युप्लुवोर्दीर्घश्छन्दसि (अष्टाध्यायीसूत्रपाठः 6/4/58), छन्दस्यपि दृश्यते (अष्टाध्यायीसूत्रपाठः 6/4/73), बहुलं छन्दस्यमाङ्योगेऽपि (अष्टाध्यायीसूत्रपाठः 6/4/75), इरयो रे (अष्टाध्यायीसूत्रपाठः 6/4/76), छन्दस्युभयथा (अष्टाध्यायीसूत्रपाठः 6/4/86), तनिपत्योश्छन्दसि (अष्टाध्यायीसूत्रपाठः 6/4/99), घसिभसोर्हलि च (अष्टाध्यायीसूत्रपाठः 6/4/100), श्रुशृणुपॄकृवृभ्यश्छन्दसि (अष्टाध्यायीसूत्रपाठः 6/4/102), अङितश्च (अष्टाध्यायीसूत्रपाठः 6/4/103), विभाषजोश्छन्दसि (अष्टाध्यायीसूत्रपाठः 6/4/162), ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानिच्छन्दसि (अष्टाध्यायीसूत्रपाठः 6/4/175), बहुलं छन्दसि (अष्टाध्यायीसूत्रपाठः 7/1/8), बहुलं छन्दसि (अष्टाध्यायीसूत्रपाठः 7/1/10), नेतराच्छन्दसि (अष्टाध्यायीसूत्रपाठः 7/1/26), क्त्वापिच्छन्दसि (अष्टाध्यायीसूत्रपाठः 7/1/38), सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः (अष्टाध्यायीसूत्रपाठः 7/1/39), अमो मश् (अष्टाध्यायीसूत्रपाठः 7/1/40), लोपस्त आत्मनेपदेषु (अष्टाध्यायीसूत्रपाठः 7/1/41), ध्वमो ध्वात् (अष्टाध्यायीसूत्रपाठः 7/1/42), यजध्वैनमिति च (अष्टाध्यायीसूत्रपाठः 7/1/43), तस्य तात् (अष्टाध्यायीसूत्रपाठः 7/1/44), तप्तनप्तनथनाश्च (अष्टाध्यायीसूत्रपाठः 7/1/45), इदन्तो मसि (अष्टाध्यायीसूत्रपाठः 7/1/46), क्त्वो यक् (अष्टाध्यायीसूत्रपाठः 7/1/47), इष्ट्वीनमिति च (अष्टाध्यायीसूत्रपाठः 7/1/48), स्नात्व्यादयश्च (अष्टाध्यायीसूत्रपाठः 7/1/49), आज्जसेरसुक् (अष्टाध्यायीसूत्रपाठः 7/1/50), श्रीग्रामण्योश्छन्दसि (अष्टाध्यायीसूत्रपाठः 7/1/56), गोः पादान्ते (अष्टाध्यायीसूत्रपाठः 7/1/57), छन्दस्यपि दृश्यते (अष्टाध्यायीसूत्रपाठः 7/1/76), ई च द्विवचने (अष्टाध्यायीसूत्रपाठः 7/1/77), दृक्स्ववस्स्वतवसां छन्दसि (अष्टाध्यायीसूत्रपाठः 7/1/83), बहुलं छन्दसि (अष्टाध्यायीसूत्रपाठः 7/1/103), ह्रु ह्वरेश्छन्दसि (अष्टाध्यायीसूत्रपाठः 7/2/31), अपरिह्वृताश्च (अष्टाध्यायीसूत्रपाठः 7/2/32), सोमे ह्वरितः (अष्टाध्यायीसूत्रपाठः 7/2/33), ग्रसितस्कभितस्तभितोत्तभितचतविकस्ताविशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरितिक्षमितिवमित्यमितीति च (अष्टाध्यायीसूत्रपाठः 7/2/34), बहुलं छन्दसि (अष्टाध्यायीसूत्रपाठः 7/3/97), नित्यं छन्दसि (अष्टाध्यायीसूत्रपाठः 7/4/8), नच्छन्दस्यपुत्रस्य (अष्टाध्यायीसूत्रपाठः 7/4/35), दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति (अष्टाध्यायीसूत्रपाठः 7/4/36), अश्वाघस्यात् (अष्टाध्यायीसूत्रपाठः 7/4/37), विभाषा छन्दसि (अष्टाध्यायीसूत्रपाठः 7/4/44), सुधितवसुधितनेमधितधिष्वधिषीय च (अष्टाध्यायीसूत्रपाठः 7/4/45), कृषेश्छन्दसि (अष्टाध्यायीसूत्रपाठः 7/4/64), दाधर्तिदर्धर्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीपफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतःसरीसृपतंवरीवृजन्मर्मृज्यागनीगन्तीति च (अष्टाध्यायीसूत्रपाठः 7/4/65), बहुलं छन्दसि (अष्टाध्यायीसूत्रपाठः 7/4/78), छन्दस्यनेकमपि साकाङ्क्षम् (अष्टाध्यायीसूत्रपाठः 8/1/35), यद्धितुपरं छन्दसि (अष्टाध्यायीसूत्रपाठः 8/1/56), वैवावेति चच्छन्दसि (अष्टाध्यायीसूत्रपाठः 8/1/64), एकान्याभ्यां समर्थाभ्याम् (अष्टाध्यायीसूत्रपाठः 8/1/65), छन्दसीरः (अष्टाध्यायीसूत्रपाठः 8/2/15), अनो नुट् (अष्टाध्यायीसूत्रपाठः 8/2/16), नाद् घस्य (अष्टाध्यायीसूत्रपाठः 8/2/17), नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि छन्दसि (अष्टाध्यायीसूत्रपाठः 8/2/61), अम्नरूधरवरित्युभयथा छन्दसि (अष्टाध्यायीसूत्रपाठः 8/2/70), भुवश्च महाव्याहृतेः (अष्टाध्यायीसूत्रपाठः 8/2/71), मतुवसो रु सम्बुद्धौ छन्दसि (अष्टाध्यायीसूत्रपाठः 8/3/1), छन्दसि वाप्राम्रेडितयोः (अष्टाध्यायीसूत्रपाठः 8/3/49), कःकरत्करतिकृधिकृतेष्वनदितेः (अष्टाध्यायीसूत्रपाठः 8/3/50), पञ्चम्याः परावध्यर्थे (अष्टाध्यायीसूत्रपाठः 8/3/51), पातौ च बहुलम् (अष्टाध्यायीसूत्रपाठः 8/3/52), षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु (अष्टाध्यायीसूत्रपाठः 8/3/53), इडाया वा (अष्टाध्यायीसूत्रपाठः 8/3/54), स्तुतस्तोमयोश्छन्दसि (अष्टाध्यायीसूत्रपाठः 8/3/105), पूर्वपदात् (अष्टाध्यायीसूत्रपाठः 8/3/106), सुञः (अष्टाध्यायीसूत्रपाठः 8/3/107), सनोतेरनः (अष्टाध्यायीसूत्रपाठः

8/3/108), सहेः पृतनर्ताभ्यां च (अष्टाध्यायीसूत्रपाठः 8/3/109), निव्यभिभ्योऽड्व्यवाये वा छन्दसि (अष्टाध्यायीसूत्रपाठः 8/3/119), छन्दस्यृदवग्रहात् (अष्टाध्यायीसूत्रपाठः 8/4/25), नश्च धातुस्थोरुषुभ्यः (अष्टाध्यायीसूत्रपाठः 8/4/26)। सम्पूर्णो योगः–218 (अष्टादशोत्तरशतद्वयम्)।

**(ख) सामर्थ्यवन्ति सूत्राणि–** एतानि तानि वैदिकसूत्राणि सन्ति येष्वेतत्प्रकारकस्य कस्यचित् शब्दस्य ('छन्दसि' इत्यादीनाम्) प्रयोगो न कृतोऽस्ति येनैतेषां वैदिकसूत्रविभागे वर्तमानानां बोधः स्यात् परन्त्वेतेषां कार्यक्षेत्रं वेदादन्यत्र सम्भव एव नास्ति। अतः सामर्थ्याद् वैदिकसूत्रत्वाद् एतानि 'सामर्थ्यवन्ति सूत्राणि' इत्येतन्नामके विभागे परिगणितानि कृतानि सन्ति। एतेषां सम्पूर्णा सङ्ख्या 16 (षोडश) अस्ति। एतानि सूत्राणि सन्ति–
शे (अष्टाध्यायीसूत्रपाठः 1/1/13) (एतत्सूत्रमस्मात् कारणाद् वैदिकसूत्रमस्ति यतो ह्यस्य कार्यक्षेत्रं 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः' (अष्टाध्यायीसूत्रपाठः 7/1/39) इत्यनेन सूत्रेण छन्दसि सुपां स्थाने क्रियमाणः 'शे' इत्येष आदेशोऽस्ति। उदाहरणार्थमस्माभिरत्र वैदिकसूत्रस्य हेतुः प्रदर्शितः, एवमेवान्यत्रापि कश्चिद्धेतुरस्त्येव यस्य विस्तरभिया प्रदर्शनमशक्यं स्यात्), न सुब्रह्मण्यायां स्वरितस्य तूदात्तः (अष्टाध्यायीसूत्रपाठः 1/2/37), देवब्रह्मणोरनुदात्तः (अष्टाध्यायीसूत्रपाठः 1/2/38), सिब्बहुलं लेटि (अष्टाध्यायीसूत्रपाठः 3/1/34), प्रत्यपिभ्यां ग्रहेः (अष्टाध्यायीसूत्रपाठः 3/1/118) ('प्रत्यपिभ्यां ग्रहेश्छन्दसि' इत्येतस्य वार्त्तिकस्य कारणादेतत्सूत्रं वैदिकसूत्रमस्ति), लेटोऽडाटौ (अष्टाध्यायीसूत्रपाठः 3/4/94), आत ऐ (अष्टाध्यायीसूत्रपाठः 3/4/95), वैतोऽन्यत्र (अष्टाध्यायीसूत्रपाठः 3/4/96), इतश्च लोपः परस्मैपदेषु (अष्टाध्यायीसूत्रपाठः 3/4/97), स उत्तमस्य (अष्टाध्यायीसूत्रपाठः 3/4/98), वाहः (अष्टाध्यायीसूत्रपाठः 4/1/61) (अग्रिमसूत्रे 'सख्यशिश्वीति भाषायाम्' इत्येतस्मिन् सूत्रे 'भाषायाम्' इत्येतस्य शब्दस्य ग्रहणादेतस्य सूत्रस्य कार्यक्षेत्रं वेद एव सीमितत्वादेतद्वैदिकसूत्रमस्ति, द्रष्टव्या– काशिकावृत्तिः 4/1/61), तुजादीनां दीर्घोऽभ्यासस्य (अष्टाध्यायीसूत्रपाठः 6/1/7), पद्दन्नोमास्– हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु (अष्टाध्यायीसूत्रपाठः 6/1/61), शमिता यज्ञे (अष्टाध्यायीसूत्रपाठः 6/4/54), सनिंससनिवांसम् (अष्टाध्यायीसूत्रपाठः 7/2/69), घोर्लोपो लेटि वा (अष्टाध्यायीसूत्रपाठः 7/3/70)। सम्पूर्णो योगः– 16 (षोडश)।

**(ग) 'मन्त्रे'सूत्राणि–** एतानि तानि वैदिकसूत्राणि सन्ति येषु 'मन्त्रे' इत्येतेन शब्देन मन्त्रेऽर्थात् संहितायामुपलब्धनां केषाञ्चिद्विशिष्टशब्दानां व्याकरणं प्रस्तुतं कृतमस्ति । एतेषां सम्पूर्णा सङ्ख्या 10 (दश) अस्ति। एतानि सूत्राणि सन्ति–
मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः (अष्टाध्यायीसूत्रपाठः 2/4/80), मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् (अष्टाध्यायीसूत्रपाठः 3/2/71), अवे यजः (अष्टाध्यायीसूत्रपाठः 3/2/72), मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः (अष्टाध्यायीसूत्रपाठः 3/3/96), ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे (अष्टाध्यायीसूत्रपाठः 6/1/146), नित्यं मन्त्रे (अष्टाध्यायीसूत्रपाठः 6/1/204), मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ (अष्टाध्यायीसूत्रपाठः 6/3/130), ओषधेश्च विभक्तावप्रथमायाम् (अष्टाध्यायीसूत्रपाठः 6/3/131), जनिता मन्त्रे (अष्टाध्यायीसूत्रपाठः 6/4/53), मन्त्रेष्वाङ्यादेरात्मनः (अष्टाध्यायीसूत्रपाठः 6/4/141)। सम्पूर्णो योगः– 10 (दश)।

**(घ) 'ऋचि'सूत्राणि–** एतानि तानि वैदिकसूत्राणि सन्ति येषु 'ऋचि' इत्येतेन शब्देन ऋच्यर्थात् केवलमृग्वेद एवोपलब्धानां केषाञ्चिद्विशिष्टशब्दानां व्याकरणं प्रस्तुतं कृतमस्ति । एतेषां सम्पूर्णा सङ्ख्या 7 (सप्त) अस्ति। एतानि सूत्राणि सन्ति–
ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् (अष्टाध्यायीसूत्रपाठः 6/3/132), इकः सुञि (अष्टाध्यायीसूत्रपाठः 6/3/133), द्व्यचोऽतस्तिङः (अष्टाध्यायीसूत्रपाठः 6/3/134), निपातस्य च (अष्टाध्यायीसूत्रपाठः 6/3/135), कव्यध्वरपृतनस्यर्चि लोपः (अष्टाध्यायीसूत्रपाठः 7/4/39), उभयथर्क्षु (अष्टाध्यायीसूत्रपाठः 8/3/8), दीर्घादटि समानपादे (अष्टाध्यायीसूत्रपाठः 8/3/9)। सम्पूर्णो योगः– 7 (सप्त)।

**(घ) 'यजुषि'सूत्राणि–** एतानि वैदिकसूत्राणि सन्ति येषु 'यजुषि' इत्येतेन शब्देन यजुष्यर्थात् केवलं यजुर्वेद एवोपलब्धानां केषाञ्चिद्विशिष्टशब्दानां व्याकरणं प्रस्तुतं कृतमस्ति। एतेषां सम्पूर्णा सङ्ख्या 7 (सप्त) अस्ति। एतानि सूत्राणि सन्ति–
यजुष्युरः (अष्टाध्यायीसूत्रपाठः 6/1/113), आपोजुषाणोवृष्णोवर्षिष्ठे अम्बेअम्बालेअम्बिकेपूर्वे (अष्टाध्यायीसूत्रपाठः 6/1/114), अङ्ग इत्यादौ च (अष्टाध्यायीसूत्रपाठः 6/1/115), अनुदात्ते च कुधपरे (अष्टाध्यायीसूत्रपाठः 6/1/116), अवपथासि च (अष्टाध्यायीसूत्रपाठः 6/1/117), देवसुम्नयोर्यजुषि काठके (अष्टाध्यायीसूत्रपाठः 7/4/38), यजुष्येकेषाम् (अष्टाध्यायीसूत्रपाठः 8/3/104)। सम्पूर्णो योगः– 7 (सप्त)।

**(च) 'निगमे'सूत्राणि–** एतानि तानि वैदिकसूत्राणि सन्ति येषु 'निगमे' इत्येतेन शब्देन निगमेऽर्थाद् वेद एवोपलब्धानां केषाञ्चिद्विशिष्टशब्दानां व्याकरणं प्रस्तुतं कृतमस्ति। एतेषां सम्पूर्णा सङ्ख्या 5 (पञ्च) अस्ति। एतानि सूत्राणि सन्ति–
साढ्यै साढ्वा साढेति निगमे (अष्टाध्यायीसूत्रपाठः 6/3/112), वा षपूर्वस्य निगमे (अष्टाध्यायीसूत्रपाठः 6/4/9), बभूथाततन्थजगृम्भववर्थेति निगमे (अष्टाध्यायीसूत्रपाठः 7/2/64), मीनातेर्निगमे (अष्टाध्यायीसूत्रपाठः 7/3/81), ससूवेति निगमे (अष्टाध्यायीसूत्रपाठः 7/4/74)। सम्पूर्णो योगः– 5 (पञ्च)।

**(छ) 'अन्तःपादं'सूत्राणि–** एतानि तानि वैदिकसूत्राणि सन्ति येषु 'अन्तःपादम्' इत्येतेन शब्देन मन्त्राणां पादानां मध्य उपलब्धानां केषाञ्चिद्विशिष्टशब्दानां व्याकरणं प्रस्तुतं कृतमस्ति । एतेषां सम्पूर्णा सङ्ख्या 3 (त्रयम्) अस्ति। एतानि सूत्राणि सन्ति–
प्रकृत्यान्तःपादम् (अष्टाध्यायीसूत्रपाठः 6/1/111), अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च (अष्टाध्यायीसूत्रपाठः 6/1/112), युष्मत्तत्ततक्षुःष्वन्तःपादम् (अष्टाध्यायीसूत्रपाठः 8/3/103)। सम्पूर्णो योगः– 3 (त्रयम्)।

**(ज) 'पादपूरणं'सूत्राणि–** एतानि तानि वैदिकसूत्राणि सन्ति येषु 'पादपूरणम्' इत्येतेन शब्देन मन्त्राणां पादपूर्तौ प्रयुक्तानां केषाञ्चिद्विशिष्टशब्दानां व्याकरणं प्रस्तुतं कृतमस्ति । एतेषां सम्पूर्णा सङ्ख्या 2 (द्वयम्) अस्ति। एतानि सूत्राणि सन्ति–
सोऽचि लोपे चेत्पादपूरणम् (अष्टाध्यायीसूत्रपाठः 6/1/130), प्रसमुपोदः पादपूरणे (अष्टाध्यायीसूत्रपाठः 8/1/6)। सम्पूर्णो योगः– 2 (द्वयम्)।

**(झ) 'ब्राह्मणे'सूत्राणि–** एतानि तानि वैदिकसूत्राणि सन्ति येषु 'ब्राह्मणे' इत्येतेन शब्देन ब्राह्मणग्रन्थेषूपलब्धानां केषाञ्चिद्विशिष्टशब्दानां व्याकरणं प्रस्तुतं कृतमस्ति । एतेषां सम्पूर्णा सङ्ख्या 1 (एकम्) अस्ति। एतत्सूत्रमस्ति–
द्वितीया ब्राह्मणे (अष्टाध्यायीसूत्रपाठः 2/3/60)। सम्पूर्णो योगः– 1 (एकम्)।
अनेन प्रकारेण सर्वेषां नवप्रकारकाणां वैदिकसूत्राणां सम्पूर्णा सङ्ख्या (218+16+10+7+7+5+3+2+1) 269 (एकोनसप्तत्युत्तरशतद्वयम्) भवति।

**2, लौकिकसूत्राणि–** सम्पूर्णायामष्टाध्याय्यां लौकिकसूत्राणां सम्पूर्णा सङ्ख्या 14 (चतुर्दश) अस्ति। एतेषु सूत्रेषु प्रायो 'भाषायाम्' इत्येतेन शब्देन लौकिकसूत्राणां विभागः कृतोऽस्ति परन्तु कुत्रचित् 'अमन्त्रे', 'अच्छन्दसि' इत्यादिभिः शब्दैरपि लौकिकसूत्राणां विभागः कृतोऽस्ति।

वयमेतत्प्रकारकेषु शब्दार्थेषु कस्यचिद्विशेषभेदस्याभावादेतानि सर्वाणि सूत्राण्येकस्यां लौकिकसूत्राणां श्रेण्यामेव स्थापितवन्तः। एतानि सूत्राणि सन्ति–

कास्प्रत्ययादाममन्त्रे लिटि (अष्टाध्यायीसूत्रपाठः 3/1/35), इजादेश्च गुरुमतोऽनृच्छः (अष्टाध्यायीसूत्रपाठः 3/1/36), दयायासश्च (अष्टाध्यायीसूत्रपाठः 3/1/37), उषविदजागृभ्योऽन्यतरस्याम् (अष्टाध्यायीसूत्रपाठः 3/1/38), भीह्रीभृहुवां श्लुवच्च (अष्टाध्यायीसूत्रपाठः 3/1/39) (यद्यप्येतेषु सूत्रेषु 'अमन्त्रे' इत्येतस्य शब्दस्य कथनाद् ब्राह्मणादिग्रन्थेष्वपि व्याप्तिरस्ति परन्तु लौकिकक्षेत्रस्याधिकतायाः कारणादेतानि सूत्राणि लौकिकसूत्राणां विभाग एव परिगणितानि सन्ति), भाषायां सदवसश्रुवः (अष्टाध्यायीसूत्रपाठः 3/2/108), सख्यशिश्वीति भाषायाम् (अष्टाध्यायीसूत्रपाठः 4/1/62), सञ्ज्ञायाम् (अष्टाध्यायीसूत्रपाठः 4/1/72) (अत्र 'संज्ञायाम्' इत्येतस्य शब्दस्य कथनात् छन्दोरहितायारर्थाल्लौकिकसंज्ञाया एव ग्रहणमस्ति), मयड् वैतयोर्भाषायामभक्ष्याच्छादनयोः (अष्टाध्यायीसूत्रपाठः 4/3/141), नित्यं वृद्धशरादिभ्यः (अष्टाध्यायीसूत्रपाठः 4/3/142), प्रागेकादशभ्योऽच्छन्दसि (अष्टाध्यायीसूत्रपाठः 5/3/49), षष्ठाष्टमाभ्यां ञ च (अष्टाध्यायीसूत्रपाठः 5/3/50), विभाषा भाषायाम् (अष्टाध्यायीसूत्रपाठः 6/1/175), पूर्वं तु भाषायाम् (अष्टाध्यायीसूत्रपाठः 8/2/98)। सम्पूर्णो योगः– 14 (चतुर्दश)।

अनेन प्रकारेण सर्वेषां लौकिकसूत्राणां सम्पूर्णा सङ्ख्या 14 (चतुर्दश) भवति।

**3–सामान्यसूत्राणि–** सम्पूर्णायामष्टाध्याय्यां सामान्यसूत्राणां सम्पूर्णा सङ्ख्या सर्वाधिका 3681 (एकाशीत्युत्तरशतषडधिकसहस्रत्रयम्) अस्ति। वैदिकलौकिकसूत्रोभ्योऽवशिष्टानि यान्यपि सूत्राणि सन्ति तानि सर्वाणि सामान्यसूत्राणां विभागे परिगणितानि कृतानि सन्ति । अतोऽत्र तेषां सूत्राणां स्वरूपस्थानयोः प्रदर्शनमनावश्यकमस्ति। यद्यपि पुरुषोत्तमदेवो भाषावृत्तिकार इत्यादय आचार्या भाषाप्रधानसूत्राणां परिगणनायामुदात्तानुदात्तस्वरितादिस्वरविधायकसूत्राणां परिगणनां न कृतवन्तः, तानि वैदिकमुक्त्वा त्यक्तवन्तो लोके स्वराणां प्रयोगाभावादिति। परन्तु वयमेतादृशानि सूत्राणि सामान्यसूत्राणां विभाग एव स्थापितवन्तो यतो हि काममुदात्तानुदात्तस्वरितादिस्वराणां प्रयोगो लोके वर्तमानसमये विलुप्तो जातः स्यात् परन्तु पाणिनिरेतां धारणां धारयन् सूत्राणां प्रवचनं न कृतवानन्यथा तु स सर्वाण्युदात्तानुदात्तस्वरितादिस्वरविधायकसूत्राणि 'छन्दसि' इत्यादिभिः शब्दैरुक्त्वा तेषां कार्यक्षेत्रं सीमितं कुर्यात्। पुरुषोत्तमदेवादीनामाचार्याणां मन्तव्यं व्यवहारप्रधानमस्ति परन्तु सङ्ख्यात्मके विश्लेषणे तां व्यवहारप्रधानतामाधारं न मन्तुं शक्यते। एतदतिरिक्तं वयं याज्ञिकसूत्राण्यपि सामान्यसूत्राणां श्रेण्यामेव स्थापितवन्तो यतो हि कामं यज्ञे वैदिकमन्त्राणां प्रयोगो भवति परन्तु तस्मिन् अमन्त्रशब्दानां यथा– 'इदं न मम', 'वौषट्' इत्यादीनां शब्दानामपि प्रयोगो भवति। यदि प्रत्याहारसूत्राणामपि ('अथ शब्दानुशासनम्' इत्येतत्सूत्रसहितम्) गणना क्रियेत तर्हि सामान्यसूत्राणां सम्पूर्णा सङ्ख्या (3681+15) 3696 (षण्णवत्युत्तरशतषडधिकसहस्रत्रयम्) भवति।

अनेन प्रकारेण सम्पूर्णायामष्टाध्याय्यां सर्वेषां सूत्राणां सम्पूर्णा सङ्ख्या (269+14+3696) 3979 (एकोनाशीत्युत्तरशतनवाधिकसहस्रत्रयम्) भवति।

वयमेतं सङ्ख्यात्मकं विश्लेषणमधिकतमसावधनतया कृतवन्तः परन्त्वस्माभिर्मानवीयत्रुटीनामस्वीकारो नास्ति। अतः केचन विद्वांसोऽस्मत्कृते काश्चित्त्रुटीरवगताः कारयिष्यन्ति चेत्तर्हि ता अस्माभिर्विनम्रतापूर्वकं स्वीकरिष्यन्ते। अनेन सार्धमेवास्माकं पार्श्वे सर्वेषां सूत्राणां सङ्ख्यात्मके विश्लेषणे तेषां वर्णितविभागेषु स्थापनस्य हेतव उपस्थितास्सन्ति येषां विस्तरभियात्र प्रदर्शनमसम्भव एवासीत्, अतः कैश्चिद्विद्वद्भिः काश्चित् शङ्का उत्थापिता भविष्यन्ति चेत्तर्हि ताः सर्वथा स्वागतयोग्याः समाधानयोग्याश्च भविष्यन्तीति विश्वासयामः।

**विशेषः–** एतत्प्रकारकं सङ्ख्यात्मकं विश्लेषणं यद्यपि बौद्धिकदृष्ट्या व्याकरणाध्येतृभ्योऽधिकोपयोगी न स्यात् परन्तु तथ्यान्वेषणस्य महत्त्वस्य दृष्ट्यास्माभिरयं नीरसः प्रयासः कृतोऽस्ति। अन्यैर्दृष्टिकोणैरप्यस्माभिरष्टाध्याय्या एतत्प्रकारकं सङ्ख्यात्मकमसङ्ख्यात्मकं वा विश्लेषणं श्रीप्रभूणां कृपया क्रियमाणतापरिधावस्ति यत्तु श्रीप्रभूणां कृपयैव पूर्णतां लब्ध्वा यथाशीघ्रं यथासम्भवमागामिष्वङ्केषूपलभ्येत यदि सम्पादकमहोदयैः स्वकीयपत्रिकायामस्माकमेतादृशानां शोधपत्राणां प्रकाशनयोग्यता परिलक्षिता स्यादिति विरमामः।।

## सन्दर्भ

1. अष्टाध्यायीसूत्रपाठः, प्रकाशकः- रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरयाणा।